स्नेहस्य दुःखमूलत्वम् । यथा —
"यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम् ।
स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत् सुखम् ॥"
इति गारुडे । ११३ । ५८ ॥
तैलादिरसभेदः । इति मेदिनी ॥ (यथा, माघः । २ । ८५ ।
"मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते ।
प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया ॥"
यथा च मनुः । ५ । २४ ।
"यत्किञ्चित् स्नेहसंयुक्तं भोज्यं भोज्यमगर्हितम् ।
तत् पर्य्युषितमप्याद्यं हविःशेषञ्च यद्भवेत् ॥")
न्यायमते गुणविशेषः । जलीयपरमाणावयं नित्यः । अन्यत्र त्वनित्यः । तैलादावस्य प्रकर्षो वर्त्तते अतस्तेषां दाहो भवति । यथा, —
"स्नेहो जलेऽसौ नित्योऽयमनित्योऽवयविन्यसौ ।
तैलान्तरे तत्प्रकर्षात् दहनस्यानुकूलता ॥"
इति भाषापरिच्छेदः ॥

स्नेहनं, क्ली, (स्निह्यत्यनेनेति । स्निह + ल्युट् ।) तैलमर्द्दनम् । तत्पर्य्यायः । स्नेहः २ स्निग्धता ३ म्रक्षणम् ४ म्रक्षः ५ अभ्यङ्गः ६ अभ्यञ्जनम् ७ । इति राजनिर्घण्टः ॥ (स्नेहयतीति । स्निह + णिच् + ल्युः । स्निग्धकारिणि, त्रि । यथा, सुश्रुते । १ । ४५ ।
"घृतं सौम्यं शीतवीर्य्यं मृदुमधुरमल्पाभिष्यन्दि स्नेहनमिति ॥")

स्नेहप्रियः, पुं, (स्नेहः प्रियो यस्य ।) प्रदीपः । इति हेमचन्द्रः ॥ तैलादिप्रिये, त्रि ॥

स्नेहबीजः, पुं, (स्नेहयुक्तानि बीजानि यस्य ।) पियालवृक्षः । इति राजनिर्घण्टः ॥ स्नेहकारणे, क्ली ॥

स्नेहभूः, पुं, (स्नेहात् भूरुत्पत्तिर्यस्य ।) श्लेष्मा । इति हेमचन्द्रः ॥ (स्नेहा भूरिति ।) स्निग्धभूमौ, स्त्री ॥ (स्नेहान्विता भूर्यस्येति स्निग्धभूमिविशिष्टे, त्रि ॥)

स्नेहरङ्गः, पुं, (स्नेहेन रज्यते इति । रञ्ज + घञ् ।) तिलः । इति शब्दरत्नावली ॥

स्नेहवती, स्त्री, (स्नेहोऽस्या अस्तीति । स्नेह + मतुप् । मस्य वः । ङीप् ।) मेदा । इति राजनिर्घण्टः ॥ (तैलादिरसविशिष्टे प्रीतिविशिष्टे च त्रि । यथा, मार्कण्डेये । २३ । ७७ ।
"एवमुक्तौ ततस्तेन पित्रा स्नेहवता तु तौ ।
गत्वा तस्य पुरं सख्यू रेमाते तेन धीमता ॥")

स्नेहवस्तिः, स्त्री, (स्नेहस्य वस्तिः ।) अनुवासनवस्तिः । तैलपिच्‌किरी इति भाषा । यथा, —
"वस्तिर्द्विविधानुवासाख्यो निरूहश्च ततः परः ।
यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥"
इति भावप्रकाशः ॥
एतद्विवरणं वस्तिशब्दे द्रष्टव्यम् ॥

स्नेहविद्धं, क्ली, (स्नेहेन विद्धम् ।) देवदारु । इति जटाधरः ॥

स्नेहा, [न्] पुं, (स्निह्यतीति । स्निह + "श्वन्नुक्षन् पूषन्निति ।" उणा० १ । १५८ । इति कनिन्प्रत्ययेन साधुः ।) रोगविशेषः । इत्युणादिकोषः ॥ बन्धुः । चन्द्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

स्नेहाशः, पुं, (स्नेहमश्नातीति । अश भोजने + अण् ।) प्रदीपः । इति त्रिकाण्डशेषः ॥

स्नेहितः, पुं, (स्नेहोऽस्य जातः । स्नेह + इतच् ।) बन्धुः । स्नेहयुक्ते, त्रि ॥

स्नेही, [न्] पुं, (स्नेहोऽस्यास्तीति । इनिः ।) वयस्यः । इति त्रिकाण्डशेषः ॥ चित्रकारः । इति केचित् ॥ स्नेहयुक्ते, त्रि ॥

स्नेहुः, पुं, (स्निह्यतीति । स्निह + "भृमृशीङिति ।" उणा० १ । ११ । इति उः ।) रोगभेदः । इत्युणादिकोषः ॥ चन्द्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

स्पद, इ ङ ईषत्कम्पे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) इ, स्पन्द्यते । ङ, स्पन्दते चक्षुः । पस्पन्दे । काशे स्पन्द कुशे स्पन्द स्पन्दत्वं शत्रुमस्तके । इत्यादौ गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु स्पन्दते स्पन्दः पचादित्वादच् ततः स्पन्द इवाचरति इति क्वौ सिद्धिः । इति दुर्गादासः ॥

स्पन्दः, पुं, (स्पन्द + घञ् ।) प्रस्फुरणम् । ईषत्कम्पनम् । यथा, —
"चक्षुःस्पन्दं भुजस्पन्दं तथा दुःस्वप्नदर्शनम् ।
शत्रूणाञ्च समुत्थानमश्वत्थ शमयाशु मे ।
अश्वत्थरूपो भगवान् प्रीयतां मे जनार्द्दनः ॥"
इति मलमासतत्त्वम् ॥ * ॥
अङ्गविस्फुरणे शुभाशुभफलं यथा, —
मनुरुवाच ।
"ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च ।
सर्व्वधर्म्मभृतां श्रेष्ठ ! त्वं हि धर्म्मविदुच्यसे ॥
मत्स्य उवाच ।
अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत् ।
अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च ॥
मनुरुवाच ।
अङ्गानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम् ।
तन्मे विस्तरतो ब्रूहि येन स्युस्तद्विदो भुवि ॥
मत्स्य उवाच ।
पृथ्वीलाभो भवेत् मूर्द्ध्नि ललाटे रविनन्दन ! ।
स्थानं विवृद्धिमायाति भ्रूनसोः प्रियसङ्गमः ॥
भृत्यलब्धिश्चाक्षिदेशे दृगुपान्ते धनागमः ।
उत्कण्ठोपगमो मध्ये दृष्टं राजन् ! विचक्षणैः ॥
दृग्बन्धने सङ्गरे च जयं शीघ्रमवाप्नुयात् ।
योषिल्लाभोऽपाङ्गदेशे श्रवणान्ते प्रिया श्रुतिः ॥
नासिकायां प्रीतिसौख्यं प्रियाप्तिरधरोष्ठयोः ।
कण्ठे तु भोगलाभः स्यात् भोगवृद्धिरथांसयोः ॥
सुहृत्स्नेहश्च बाहुभ्यां हस्ते चैव धनागमः ।
पृष्ठे पराजयो योधे जयो वक्षःस्थले भवेत् ॥
कुक्षिभ्यां प्रोक्तिरुद्दिष्टा स्त्रियाः प्रजननं स्तने ।
स्थानभ्रंशो नाभिदेशे अन्त्रे चैव धनागमः ॥
जानुसन्धौ परैः सन्धिर्बलवद्भिर्भवेन्नृप ! ।
दिशैकदेशनाशोऽथ जङ्घाभ्यां रविनन्दन ! ॥
उत्तमं स्थानमाप्नोति पद्भ्यां प्रस्फुरणान्नृप ! ।
सलाभञ्चाध्वगमनं भवेत् पदतले नृप ! ॥
लाञ्छनं पिटकञ्चैव ज्ञेयं प्रस्फुरणं तथा ।
विपर्य्ययेन विहितं सर्व्वं स्त्रीणां विपर्य्ययम् ॥
दक्षिणेऽपि प्रशस्तेऽङ्गे प्रशस्तं स्याद्विशेषतः ।
अप्रशस्त तथा वामे त्वप्रशस्तं विशेषतः ॥
अतोऽन्यथासिद्धिरजल्पनात्तु
फलस्य शस्तस्य च निन्दितस्य ।
अनिष्टचिह्नोपगमे द्विजानां
कार्य्यं सुवर्णेन च तर्पणं स्यात् ॥
इति मात्स्ये यात्रानिमित्तदेहस्पन्दनं नाम २४१ । ३—१४ ॥

स्पन्दनं, क्ली, (स्पन्द + ल्युट् ।) प्रस्फुरणम् । ईषत्कम्पनम् । (यथा, याज्ञवल्क्यः । १ । ११ ।
"गर्भाधानमृतौ पुंसःसवनं स्पन्दनात् पुरा ।
षष्ठेऽष्टमे वा सीमन्तो मास्यते जातकर्म्म च ॥")

स्परिता, [ऋ] त्रि, दुःखकारणम् । तच्च शत्रुदुर्ज्जनरोगादि । इति केचित् ॥

स्परिशः, पुं, स्पर्शः । इति केचित् ॥

स्पर्द्ध, ङ संहर्षे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) संहर्षः परिभवेच्छा । इति वोपदेवः ॥ ङ, स्पर्द्धते बलिनं बली । पस्पर्द्धे । इति दुर्गादासः ॥

स्पर्द्धा, स्त्री, (स्पर्द्ध + भिदादित्वादङ् । टाप् ।) संहर्षः । (यथा, महाभारते । १ । २१ । १७ ।
"महानदीभिर्बह्वीभिः स्पर्द्धयेव सहस्रशः ।
अभिसार्य्यमाणमनिशं ददृशाते महार्णवम् ॥")
क्रमसमुन्नतिः । साम्यम् । इति मेदिनी ॥

स्पर्श, क ङ ग्रहणे । श्लेषे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, स्पर्शयते । इति दुर्गादासः ॥

स्पर्शः, पुं, (स्पृश स्पर्शने, स्पर्श ग्रहणे वा + घञ् ।) रुजा । दानम् । स्पर्शनम् । (यथा, उत्तररामचरिते । १ अङ्के ।
"विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च ॥")
स्पर्शकः । सम्परायः । प्रणिधिः । इति मेदिनी ॥
उपतप्ता । इत्यमरः । ३ । २ । १४ ॥ वर्गाक्षरम् । इति हेमचन्द्रः ॥ (यथा, भागवते । २ । ८ । ६ ।
"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोत् द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत् षोड़शमेकविंशं
निष्किञ्चनानां नृप ! यद्धनं विदुः ॥")
वायुः । इति केचित् ॥ कामिनां बन्धभेदः । इति शब्दरत्नावली ॥ कादिवर्गपञ्चकम् । यथा, —
"स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ॥"
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः ॥
स्पर्शः कादिवर्गपञ्चकम् । इति तट्टीकायां श्रीधरस्वामी ॥ न्यायमते त्वगिन्द्रियग्राह्यगुण-